# ॥ શ્રીશનૈશ્ચરસહસ્રનામસ્તોત્રમ્ ॥

.. shrI shanaishchara sahasranAma stotram ..

sanskritdocuments.org

August 2, 2016

# .. shrI shanaishchara sahasranAma stotram ..

# ॥ શ્રીશનૈશ્ચરસહસ્રનામસ્તોત્રમ્ ॥

## Document Information


Text title : shanaishchara sahasranAma stotra

File name : shanaishcharasahasra.itx

Category : sahasranAma

Location : doc_z_misc_navagraha

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Kirk Wortman kirkwort at hotmail.com

Proofread by : Kirk Wortman kirkwort at hotmail.com

Latest update : April 11, 2007

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.



August 2, 2016

sanskritdocuments.org

# ॥ શ્રીશનૈશ્ચરસહસ્રનામસ્તોત્રમ્ ॥

અસ્ય શ્રીશનૈશ્ચરસહસ્રનામસ્તોત્ર મહામન્ત્રસ્ય ।
કાશ્યપ ઋષિઃ । અનુષ્ટુપ્ છન્દઃ ।
શનૈશ્ચરો દેવતા । શમ્ બીજમ્ ।
નમ્ શક્તિઃ । મમ્ કીલકમ્ ।
શનૈશ્ચરપ્રસાદાસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
શનૈશ્ચરાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
મન્દગતયે તર્જનીભ્યાં નમઃ ।
અધોક્ષજાય મધ્યમાભ્યાં નમઃ ।
સૌરયે અનામિકાભ્યાં નમઃ ।
શુષ્કોદરાય કનિષ્ઠિકાભ્યાં નમઃ ।
છાયાત્મજાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
શનૈશ્ચરાય હૃદયાય નમઃ ।
મન્દગતયે શિરસે સ્વાહા ।
અધોક્ષજાય શિખાયૈ વષટ્ ।
સૌરયે કવચાય હુમ્ ।
શુષ્કોદરાય નેત્રત્રયાય વૌષટ્ ।
છાયાત્મજાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃ સુવરોમિતિ દિગ્બન્ધઃ ।
।ધ્યાનમ્ ।
ચાપાસનો ગૃધ્રધરસ્તુ નીલઃ
પ્રત્યઙ્મુખઃ કાશ્યપ ગોત્રજાતઃ ।
સશૂલચાપેષુ ગદાધરોઽવ્યાત્
સૌરાષ્ટ્રદેશપ્રભવશ્ચ શૌરિઃ ॥

નીલામ્બરો નીલવપુઃ કિરીટી
ગૃધ્રાસનસ્થો વિકૃતાનનશ્ચ ।
કેયૂરહારાદિવિભૂષિતાઙ્ગઃ
સદાઽસ્તુ મે મન્દગતિઃ પ્રસન્નઃ ॥

ૐ ॥ અમિતાભાષ્યઘહરઃ અશેષદુરિતાપહઃ ।
અઘોરરૂપોઽતિદીર્ઘકાયોઽશેષભયાનકઃ ॥ ૧॥

અનન્તો અન્નદાતા ચાશ્વત્થમૂલજપપ્રિયઃ ।
અતિસમ્પત્પ્રદોઽમોઘઃ અન્યસ્તુત્યા પ્રકોપિતઃ ॥ ૨॥

અપરાજિતો અદ્વિતીયઃ અતિતેજોઽભયપ્રદઃ ।
અષ્ટમસ્થોઽઞ્જનનિભઃ અખિલાત્માર્કનન્દનઃ ॥ ૩ ॥

અતિદારુણ અક્ષોભ્યઃ અપ્સરોભિઃ પ્રપૂજિતઃ ।
અભીષ્ટફલદોઽરિષ્ટમથનોઽમરપૂજિતઃ ॥ ૪॥

અનુગ્રાહ્યો અપ્રમેય પરાક્રમ વિભીષણઃ ।
અસાધ્યયોગો અખિલ દોષઘ્નઃ અપરાકૃતઃ ॥ ૫॥

અપ્રમેયોઽતિસુખદઃ અમરાધિપપૂજિતઃ ।
અવલોકાત્ સર્વનાશઃ અશ્વત્થામ દ્વિરાયુધઃ ॥ ૬॥

અપરાધસહિષ્ણુશ્ચ અશ્વત્થામ સુપૂજિતઃ ।
અનન્તપુણ્યફલદો અતૃપ્તોઽતિબલોઽપિ ચ ॥ ૭॥

અવલોકાત્ સર્વવન્દ્યઃ અક્ષીણકરુણાનિધિઃ ।
અવિદ્યામૂલનાશશ્ચ અક્ષય્યફલદાયકઃ ॥ ૮॥

આનન્દપરિપૂર્ણશ્ચ આયુષ્કારક એવ ચ ।
આશ્રિતેષ્ટાર્થવરદઃ આધિવ્યાધિહરોઽપિ ચ ॥ ૯॥

આનન્દમય આનન્દકરો આયુધધારકઃ ।
આત્મચક્રાધિકારી ચ આત્મસ્તુત્યપરાયણઃ ॥ ૧૦॥

આયુષ્કરો આનુપૂર્વ્યઃ આત્માયત્તજગત્ત્રયઃ ।
આત્મનામજપપ્રીતઃ આત્માધિકફલપ્રદઃ ॥ ૧૧॥

આદિત્યસંભવો આર્તિભઞ્જનો આત્મરક્ષકઃ ।
આપદ્બાન્ધવ આનન્દરૂપો આયુઃપ્રદોઽપિ ચ ॥ ૧૨॥

આકર્ણપૂર્ણચાપશ્ચ આત્મોદ્દિષ્ટ દ્વિજપ્રદઃ ।
આનુકૂલ્યો આત્મરૂપ પ્રતિમાદાન સુપ્રિયઃ ॥ ૧૩ ॥

આત્મારામો આદિદેવો આપન્નાર્તિ વિનાશનઃ ।
ઇન્દિરાર્ચિતપાદશ્ચ ઇન્દ્રભોગફલપ્રદઃ ॥ ૧૪॥

ઇન્દ્રદેવસ્વરૂપશ્ચ ઇષ્ટેષ્ટવરદાયકઃ ।
ઇષ્ટાપૂર્તિપ્રદ ઇન્દુમતીષ્ટવરદાયકઃ ॥ ૧૫॥

ઇન્દિરારમણપ્રીત ઇન્દ્રવંશનૃપાર્ચિતઃ ।
ઇહામુત્રેષ્ટફલદ ઇન્દિરારમણાર્ચિતઃ ॥ ૧૬॥

ઈદ્રિય ઈશ્વરપ્રીત ઈષણાત્રયવર્જિતઃ ।
ઉમાસ્વરૂપ ઉદ્બોધ્ય ઉશના ઉત્સવપ્રિયઃ ॥ ૧૭॥

ઉમાદેવ્યર્ચનપ્રીત ઉચ્ચસ્થોચ્ચફલપ્રદઃ ।
ઉરુપ્રકાશ ઉચ્ચસ્થ યોગદ ઉરુપરાક્રમઃ ॥ ૧૮॥

ઊર્ધ્વલોકાદિસઞ્ચારી ઊર્ધ્વલોકાદિનાયકઃ ।
ઊર્જસ્વી ઊનપાદશ્ચ ઋકારાક્ષરપૂજિતઃ ॥ ૧૯॥

ઋષિપ્રોક્ત પુરાણજ્ઞ ઋષિભિઃ પરિપૂજિતઃ ।
ઋગ્વેદવન્દ્ય ઋગ્રૂપી ઋજુમાર્ગ પ્રવર્તકઃ ॥ ૨૦॥

લુળિતોદ્ધારકો લૂત ભવપાશપ્રભઞ્જનઃ ।
લૂકારરૂપકો લબ્ધધર્મમાર્ગપ્રવર્તકઃ ॥ ૨૧॥

એકાધિપત્યસામ્રાજ્યપ્રદ એનૌઘનાશનઃ ।
એકપાદ્યેક એકોનવિંશતિમાસભુક્તિદઃ ॥ ૨૨॥

એકોનવિંશતિવર્ષદશ એણાઙ્કપૂજિતઃ ।
ઐશ્વર્યફલદ ઐન્દ્ર ઐરાવતસુપૂજિતઃ ॥ ૨૩॥

ઓંકાર જપસુપ્રીત ઓંકાર પરિપૂજિતઃ ।
ઓંકારબીજ ઔદાર્ય હસ્ત ઔન્નત્યદાયકઃ ॥ ૨૪॥

ઔદાર્યગુણ ઔદાર્ય શીલ ઔષધકારકઃ ।
કરપઙ્કજસન્નદ્ધધનુશ્ચ કરુણાનિધિઃ ॥ ૨૫॥

કાલઃ કઠિનચિત્તશ્ચ કાલમેઘસમપ્રભઃ ।
કિરીટી કર્મકૃત્ કારયિતા કાલસહોદરઃ ॥ ૨૬॥

કાલામ્બરઃ કાકવાહઃ કર્મઠઃ કાશ્યપાન્વયઃ ।
કાલચક્રપ્રભેદી ચ કાલરૂપી ચ કારણઃ ॥ ૨૭॥

કારિમૂર્તિઃ કાલભર્તા કિરીટમકુટોજ્જ્વલઃ ।
કાર્યકારણ કાલજ્ઞઃ કાઞ્ચનાભરથાન્વિતઃ ॥ ૨૮॥

કાલદંષ્ટ્રઃ ક્રોધરૂપઃ કરાળી કૃષ્ણકેતનઃ ।
કાલાત્મા કાલકર્તા ચ કૃતાન્તઃ કૃષ્ણગોપ્રિયઃ ॥ ૨૯॥

કાલાગ્નિરુદ્રરૂપશ્ચ કાશ્યપાત્મજસમ્ભવઃ ।
કૃષ્ણવર્ણહયશ્ચૈવ કૃષ્ણગોક્ષીરસુપ્રિયઃ ॥ ૩૦॥

કૃષ્ણગોઘૃતસુપ્રીતઃ કૃષ્ણગોદધિષુપ્રિયઃ ।
કૃષ્ણગાવૈકચિત્તશ્ચ કૃષ્ણગોદાનસુપ્રિયઃ ॥ ૩૧॥

કૃષ્ણગોદત્તહૃદયઃ કૃષ્ણગોરક્ષણપ્રિયઃ ।
કૃષ્ણગોગ્રાસચિત્તસ્ય સર્વપીડાનિવારકઃ ॥ ૩૨॥

કૃષ્ણગોદાન શાન્તસ્ય સર્વશાન્તિ ફલપ્રદઃ ।
કૃષ્ણગોસ્નાન કામસ્ય ગઙ્ગાસ્નાન ફલપ્રદઃ ॥ ૩૩ ॥

કૃષ્ણગોરક્ષણસ્યાશુ સર્વાભીષ્ટફલપ્રદઃ ।
કૃષ્ણગાવપ્રિયશ્ચૈવ કપિલાપશુષુ પ્રિયઃ ॥ ૩૪॥

કપિલાક્ષીરપાનસ્ય સોમપાનફલપ્રદઃ ।
કપિલાદાનસુપ્રીતઃ કપિલાજ્યહુતપ્રિયઃ ॥ ૩૫॥

કૃષ્ણશ્ચ કૃત્તિકાન્તસ્થઃ કૃષ્ણગોવત્સસુપ્રિયઃ ।
કૃષ્ણમાલ્યામ્બરધરઃ કૃષ્ણવર્ણતનૂરુહઃ ॥ ૩૬॥

કૃષ્ણકેતુઃ કૃશકૃષ્ણદેહઃ કૃષ્ણામ્બરપ્રિયઃ ।
ક્રૂરચેષ્ટઃ ક્રૂરભાવઃ ક્રૂરદંષ્ટ્રઃ કુરૂપિ ચ ॥ ૩૭॥

કમલાપતિ સંસેવ્યઃ કમલોદ્ભવપૂજિતઃ ।
કામિતાર્થપ્રદઃ કામધેનુ પૂજનસુપ્રિયઃ ॥ ૩૮॥

કામધેનુસમારાધ્યઃ કૃપાયુષ વિવર્ધનઃ ।
કામધેન્વૈકચિત્તશ્ચ કૃપરાજ સુપૂજિતઃ ॥ ૩૯॥

કામદોગ્ધા ચ ક્રુદ્ધશ્ચ કુરુવંશસુપૂજિતઃ ।
કૃષ્ણાઙ્ગમહિષીદોગ્ધા કૃષ્ણેન કૃતપૂજનઃ ॥ ૪૦॥

કૃષ્ણાઙ્ગમહિષીદાનપ્રિયઃ કોણસ્થ એવ ચ ।
કૃષ્ણાઙ્ગમહિષીદાનલોલુપઃ કામપૂજિતઃ ॥ ૪૧॥

ક્રૂરાવલોકનાત્સર્વનાશઃ કૃષ્ણાઙ્ગદપ્રિયઃ ।
ખદ્યોતઃ ખણ્ડનઃ ખડ્ગધરઃ ખેચરપૂજિતઃ ॥ ૪૨॥

ખરાંશુતનયશ્ચૈવ ખગાનાં પતિવાહનઃ ।
ગોસવાસક્તહૃદયો ગોચરસ્થાનદોષહૃત્ ॥ ૪૩ ॥

ગૃહરાશ્યાધિપશ્ચૈવ ગૃહરાજ મહાબલઃ ।
ગૃધ્રવાહો ગૃહપતિર્ગોચરો ગાનલોલુપઃ ॥ ૪૪॥

ઘોરો ઘર્મો ઘનતમા ઘર્મી ઘનકૃપાન્વિતઃ ।
ઘનનીલામ્બરધરો ઙાદિવર્ણ સુસંજ્ઞિતઃ ॥ ૪૫॥

ચક્રવર્તિસમારાધ્યશ્ચન્દ્રમત્યા સમર્ચિતઃ ।
ચન્દ્રમત્યાર્તિહારી ચ ચરાચર સુખપ્રદઃ ॥ ૪૬॥

ચતુર્ભુજશ્ચાપહસ્તશ્ચરાચરહિતપ્રદઃ ।
છાયાપુત્રશ્છત્રધરશ્છાયાદેવીસુતસ્તથા ॥ ૪૭॥

જયપ્રદો જગન્નીલો જપતાં સર્વસિદ્ધિદઃ ।
જપવિધ્વસ્તવિમુખો જમ્ભારિપરિપૂજિતઃ ॥ ૪૮॥

જમ્ભારિવન્દ્યો જયદો જગજ્જનમનોહરઃ ।
જગત્ત્રયપ્રકુપિતો જગત્ત્રાણપરાયણઃ ॥ ૪૯॥

જયો જયપ્રદશ્ચૈવ જગદાનન્દકારકઃ ।
જ્યોતિશ્ચ જ્યોતિષાં શ્રેષ્ઠો જ્યોતિઃશાસ્ત્ર પ્રવર્તકઃ ॥ ૫૦॥

ઝર્ઝરીકૃતદેહશ્ચ ઝલ્લરીવાદ્યસુપ્રિયઃ ।
જ્ઞાનમૂર્તિર્જ્ઞાનગમ્યો જ્ઞાની જ્ઞાનમહાનિધિઃ ॥ ૫૧॥

જ્ઞાનપ્રબોધકશ્ચૈવ જ્ઞાનદૃષ્ટ્યાવલોકિતઃ ।
ટઙ્કિતાખિલલોકશ્ચ ટઙ્કિતૈનસ્તમોરવિઃ ॥ ૫૨॥

ટઙ્કારકારકશ્ચૈવ ટઙ્કૃતો ટામ્ભદપ્રિયઃ ।
ઠકારમય સર્વસ્વષ્ઠકારકૃતપૂજિતઃ ॥ ૫૩ ॥

ઢક્કાવાદ્યપ્રીતિકરો ડમડ્ડમરુકપ્રિયઃ ।
ડમ્બરપ્રભવો ડમ્ભો ઢક્કાનાદપ્રિયઙ્કરઃ ॥ ૫૪॥

ડાકિની શાકિની ભૂત સર્વોપદ્રવકારકઃ ।
ડાકિની શાકિની ભૂત સર્વોપદ્રવનાશકઃ ॥ ૫૫॥

ઢકારરૂપો ઢામ્ભીકો ણકારજપસુપ્રિયઃ ।
ણકારમયમન્ત્રાર્થો ણકારૈકશિરોમણિઃ ॥ ૫૬॥

ણકારવચનાનન્દો ણકારકરુણામયઃ ।
ણકારમય સર્વસ્વો ણકારૈકપરાયણઃ ॥ ૫૭॥

તર્જનીધૃતમુદ્રશ્ચ તપસાં ફલદાયકઃ ।
ત્રિવિક્રમનુતશ્ચૈવ ત્રયીમયવપુર્ધરઃ ॥ ૫૮॥

તપસ્વી તપસા દગ્ધદેહસ્તામ્રાધરસ્તથા ।
ત્રિકાલવેદિતવ્યશ્ચ ત્રિકાલમતિતોષિતઃ ॥ ૫૯॥

તુલોચ્ચયસ્ત્રાસકરસ્તિલતૈલપ્રિયસ્તથા ।
તિલાન્ન સન્તુષ્ટમનાસ્તિલદાનપ્રિયસ્તથા ॥ ૬૦॥

તિલભક્ષ્યપ્રિયશ્ચૈવ તિલચૂર્ણપ્રિયસ્તથા ।
તિલખણ્ડપ્રિયશ્ચૈવ તિલાપૂપપ્રિયસ્તથા ॥ ૬૧॥

તિલહોમપ્રિયશ્ચૈવ તાપત્રયનિવારકઃ ।
તિલતર્પણસન્તુષ્ટસ્તિલતૈલાન્નતોષિતઃ ॥ ૬૨॥

તિલૈકદત્તહૃદયસ્તેજસ્વી તેજસાન્નિધિઃ ।
તેજસાદિત્યસઙ્કાશસ્તેજોમય વપુર્ધરઃ ॥ ૬૩ ॥

તત્ત્વજ્ઞસ્તત્ત્વગસ્તીવ્રસ્તપોરૂપસ્તપોમયઃ ।
તુષ્ટિદસ્તુષ્ટિકૃત્ તીક્ષ્ણસ્ત્રિમૂર્તિસ્ત્રિગુણાત્મકઃ ॥ ૬૪॥

તિલદીપપ્રિયશ્ચૈવ તસ્ય પીડાનિવારકઃ ।
તિલોત્તમામેનકાદિનર્તનપ્રિય એવ ચ ॥ ૬૫॥

ત્રિભાગમષ્ટવર્ગશ્ચ સ્થૂલરોમા સ્થિરસ્તથા ।
સ્થિતઃ સ્થાયી સ્થાપકશ્ચ સ્થૂલસૂક્ષ્મપ્રદર્શકઃ ॥ ૬૬॥

દશરથાર્ચિતપાદશ્ચ દશરથસ્તોત્રતોષિતઃ ।
દશરથ પ્રાર્થનાક્લૃપ્ત દુર્ભિક્ષ વિનિવારકઃ ॥ ૬૭॥

દશરથ પ્રાર્થનાક્લૃપ્ત વરદ્વય પ્રદાયકઃ ।
દશરથસ્વાત્મદર્શી ચ દશરથાભીષ્ટદાયકઃ ॥ ૬૮॥

દોર્ભિર્ધનુર્ધરશ્ચૈવ દીર્ઘશ્મશ્રુજટાધરઃ ।
દશરથસ્તોત્રવરદો દશરથાભીપ્સિતપ્રદઃ ॥ ૬૯॥

દશરથસ્તોત્રસન્તુષ્ટો દશરથેન સુપૂજિતઃ ।
દ્વાદશાષ્ટમજન્મસ્થો દેવપુઙ્ગવપૂજિતઃ ॥ ૭૦॥

દેવદાનવદર્પઘ્નો દિનં પ્રતિમુનિસ્તુતઃ ।
દ્વાદશસ્થો દ્વાદશાત્મા સુતો દ્વાદશ નામભૃત્ ॥ ૭૧॥

દ્વિતીયસ્થો દ્વાદશાર્કસૂનુર્દૈવજ્ઞપૂજિતઃ ।
દૈવજ્ઞચિત્તવાસી ચ દમયન્ત્યા સુપૂજિતઃ ॥ ૭૨॥

દ્વાદશાબ્દંતુ દુર્ભિક્ષકારી દુઃસ્વપ્નનાશનઃ ।
દુરારાધ્યો દુરાધર્ષો દમયન્તી વરપ્રદઃ ॥ ૭૩ ॥

દુષ્ટદૂરો દુરાચાર શમનો દોષવર્જિતઃ ।
દુઃસહો દોષહન્તા ચ દુર્લભો દુર્ગમસ્તથા ॥ ૭૪॥

દુઃખપ્રદો દુઃખહન્તા દીપ્તરઞ્જિત દિઙ્મુખઃ ।
દીપ્યમાન મુખામ્ભોજો દમયન્ત્યાઃ શિવપ્રદઃ ॥ ૭૫॥

દુર્નિરીક્ષ્યો દૃષ્ટમાત્ર દૈત્યમણ્ડલનાશકઃ ।
દ્વિજદાનૈકનિરતો દ્વિજારાધનતત્પરઃ ॥ ૭૬॥

દ્વિજસર્વાર્તિહારી ચ દ્વિજરાજ સમર્ચિતઃ ।
દ્વિજદાનૈકચિત્તશ્ચ દ્વિજરાજ પ્રિયઙ્કરઃ ॥ ૭૭॥

દ્વિજો દ્વિજપ્રિયશ્ચૈવ દ્વિજરાજેષ્ટદાયકઃ ।
દ્વિજરૂપો દ્વિજશ્રેષ્ઠો દોષદો દુઃસહોઽપિ ચ ॥ ૭૮॥

દેવાદિદેવો દેવેશો દેવરાજ સુપૂજિતઃ ।
દેવરાજેષ્ટ વરદો દેવરાજ પ્રિયઙ્કરઃ ॥ ૭૯॥

દેવાદિવન્દિતો દિવ્યતનુર્દેવશિખામણિઃ ।
દેવગાનપ્રિયશ્ચૈવ દેવદેશિકપુઙ્ગવઃ ॥ ૮૦॥

દ્વિજાત્મજાસમારાધ્યો ધ્યેયો ધર્મી ધનુર્ધરઃ ।
ધનુષ્માન્ ધનદાતા ચ ધર્માધર્મવિવર્જિતઃ ॥ ૮૧॥

ધર્મરૂપો ધનુર્દિવ્યો ધર્મશાસ્ત્રાત્મચેતનઃ ।
ધર્મરાજ પ્રિયકરો ધર્મરાજ સુપૂજિતઃ ॥ ૮૨॥

ધર્મરાજેષ્ટવરદો ધર્માભીષ્ટફલપ્રદઃ ।
નિત્યતૃપ્તસ્વભાવશ્ચ નિત્યકર્મરતસ્તથા ॥ ૮૩॥

નિજપીડાર્તિહારી ચ નિજભક્તેષ્ટદાયકઃ ।
નિર્માસદેહો નીલશ્ચ નિજસ્તોત્ર બહુપ્રિયઃ ॥ ૮૪॥

નળસ્તોત્ર પ્રિયશ્ચૈવ નળરાજસુપૂજિતઃ ।
નક્ષત્રમણ્ડલગતો નમતાં પ્રિયકારકઃ ॥ ૮૫॥

નિત્યાર્ચિતપદામ્ભોજો નિજાજ્ઞા પરિપાલકઃ ।
નવગ્રહવરો નીલવપુર્નળકરાર્ચિતઃ ॥ ૮૬॥

નળપ્રિયાનન્દિતશ્ચ નળક્ષેત્રનિવાસકઃ ।
નળપાક પ્રિયશ્ચૈવ નળપદ્મઞ્જનક્ષમઃ ॥ ૮૭॥

નળસર્વાર્તિહારી ચ નળેનાત્માર્થપૂજિતઃ ।
નિપાટવીનિવાસશ્ચ નળાભીષ્ટવરપ્રદઃ ॥ ૮૮॥

નળતીર્થસકૃત્ સ્નાન સર્વપીડાનિવારકઃ ।
નળેશદર્શનસ્યાશુ સામ્રાજ્યપદવીપ્રદઃ ॥ ૮૯॥

નક્ષત્રરાશ્યધિપશ્ચ નીલધ્વજવિરાજિતઃ ।
નિત્યયોગરતશ્ચૈવ નવરત્નવિભૂષિતઃ ॥ ૯૦॥

નવધા ભજ્યદેહશ્ચ નવીકૃતજગત્ત્રયઃ ।
નવગ્રહાધિપશ્ચૈવ નવાક્ષરજપપ્રિયઃ ॥ ૯૧॥

નવાત્મા નવચક્રાત્મા નવતત્ત્વાધિપસ્તથા ।
નવોદન પ્રિયશ્ચૈવ નવધાન્યપ્રિયસ્તથા ॥ ૯૨॥

નિષ્કણ્ટકો નિસ્પૃહશ્ચ નિરપેક્ષો નિરામયઃ ।
નાગરાજાર્ચિતપદો નાગરાજપ્રિયઙ્કરઃ ॥ ૯૩ ॥

નાગરાજેષ્ટવરદો નાગાભરણ ભૂષિતઃ ।
નાગેન્દ્રગાન નિરતો નાનાભરણભૂષિતઃ ॥ ૯૪॥

નવમિત્ર સ્વરૂપશ્ચ નાનાશ્ચર્યવિધાયકઃ ।
નાનાદ્વીપાધિકર્તા ચ નાનાલિપિસમાવૃતઃ ॥ ૯૫॥

નાનારૂપ જગત્ સ્રષ્ટા નાનારૂપજનાશ્રયઃ ।
નાનાલોકાધિપશ્ચૈવ નાનાભાષાપ્રિયસ્તથા ॥ ૯૬॥

નાનારૂપાધિકારી ચ નવરત્નપ્રિયસ્તથા ।
નાનાવિચિત્રવેષાઢ્યો નાનાચિત્ર વિધાયકઃ ॥ ૯૭॥

નીલજીમૂતસઙ્કાશો નીલમેઘસમપ્રભઃ ।
નીલાઞ્જનચયપ્રખ્યો નીલવસ્ત્રધરપ્રિયઃ ॥ ૯૮॥

નીચભાષા પ્રચારજ્ઞો નીચે સ્વલ્પફલપ્રદઃ ।
નાનાગમ વિધાનજ્ઞો નાનાનૃપસમાવૃતઃ ॥ ૯૯॥

નાનાવર્ણાકૃતિશ્ચૈવ નાનાવર્ણસ્વરાર્તવઃ ।
નાગલોકાન્તવાસી ચ નક્ષત્રત્રયસંયુતઃ ॥ ૧૦૦॥

નભાદિલોકસમ્ભૂતો નામસ્તોત્રબહુપ્રિયઃ ।
નામપારાયણપ્રીતો નામાર્ચનવરપ્રદઃ ॥ ૧૦૧॥

નામસ્તોત્રૈકચિત્તશ્ચ નાનારોગાર્તિભઞ્જનઃ ।
નવગ્રહસમારાધ્યો નવગ્રહ ભયાપહઃ ॥ ૧૦૨॥

નવગ્રહસુસમ્પૂજ્યો નાનાવેદ સુરક્ષકઃ ।
નવગ્રહાધિરાજશ્ચ નવગ્રહજપપ્રિયઃ ॥ ૧૦૩ ॥

નવગ્રહમયજ્યોતિર્નવગ્રહ વરપ્રદઃ ।
નવગ્રહાણામધિપો નવગ્રહ સુપીડિતઃ ॥ ૧૦૪॥

નવગ્રહાધીશ્વરશ્ચ નવમાણિક્યશોભિતઃ ।
પરમાત્મા પરબ્રહ્મ પરમૈશ્વર્યકારણઃ ॥ ૧૦૫॥

પ્રપન્નભયહારી ચ પ્રમત્તાસુરશિક્ષકઃ ।
પ્રાસહસ્તઃ પઙ્ગુપાદઃ પ્રકાશાત્મા પ્રતાપવાન્ ॥ ૧૦૬॥

પાવનઃ પરિશુદ્ધાત્મા પુત્રપૌત્ર પ્રવર્ધનઃ ।
પ્રસન્નાત્સર્વસુખદઃ પ્રસન્નેક્ષણ એવ ચ ॥ ૧૦૭॥

પ્રજાપત્યઃ પ્રિયકરઃ પ્રણતેપ્સિતરાજ્યદઃ ।
પ્રજાનાં જીવહેતુશ્ચ પ્રાણિનાં પરિપાલકઃ ॥ ૧૦૮॥

પ્રાણરૂપી પ્રાણધારી પ્રજાનાં હિતકારકઃ ।
પ્રાજ્ઞઃ પ્રશાન્તઃ પ્રજ્ઞાવાન્ પ્રજારક્ષણદીક્ષિતઃ ॥ ૧૦૯॥

પ્રાવૃષેણ્યઃ પ્રાણકારી પ્રસન્નોત્સવવન્દિતઃ ।
પ્રજ્ઞાનિવાસહેતુશ્ચ પુરુષાર્થૈકસાધનઃ ॥ ૧૧૦॥

પ્રજાકરઃ પ્રાતિકૂલ્યઃ પિઙ્ગળાક્ષઃ પ્રસન્નધીઃ ।
પ્રપઞ્ચાત્મા પ્રસવિતા પુરાણ પુરુષોત્તમઃ ॥ ૧૧૧॥

પુરાણ પુરુષશ્ચૈવ પુરુહૂતઃ પ્રપઞ્ચધૃત્ ।
પ્રતિષ્ઠિતઃ પ્રીતિકરઃ પ્રિયકારી પ્રયોજનઃ ॥ ૧૧૨॥

પ્રીતિમાન્ પ્રવરસ્તુત્યઃ પુરૂરવસમર્ચિતઃ ।
પ્રપઞ્ચકારી પુણ્યશ્ચ પુરુહૂત સમર્ચિતઃ ॥ ૧૧૩॥

પાણ્ડવાદિ સુસંસેવ્યઃ પ્રણવઃ પુરુષાર્થદઃ ।
પયોદસમવર્ણશ્ચ પાણ્ડુપુત્રાર્તિભઞ્જનઃ ॥ ૧૧૪॥

પાણ્ડુપુત્રેષ્ટદાતા ચ પાણ્ડવાનાં હિતઙ્કરઃ ।
પઞ્ચપાણ્ડવપુત્રાણાં સર્વાભીષ્ટફલપ્રદઃ ॥ ૧૧૫॥

પઞ્ચપાણ્ડવપુત્રાણાં સર્વારિષ્ટ નિવારકઃ ।
પાણ્ડુપુત્રાદ્યર્ચિતશ્ચ પૂર્વજશ્ચ પ્રપઞ્ચભૃત્ ॥ ૧૧૬॥

પરચક્રપ્રભેદી ચ પાણ્ડવેષુ વરપ્રદઃ ।
પરબ્રહ્મ સ્વરૂપશ્ચ પરાજ્ઞા પરિવર્જિતઃ ॥ ૧૧૭॥

પરાત્પરઃ પાશહન્તા પરમાણુઃ પ્રપઞ્ચકૃત્ ।
પાતઙ્ગી પુરુષાકારઃ પરશમ્ભુસમુદ્ભવઃ ॥ ૧૧૮॥

પ્રસન્નાત્સર્વસુખદઃ પ્રપઞ્ચોદ્ભવસમ્ભવઃ ।
પ્રસન્નઃ પરમોદારઃ પરાહઙ્કારભઞ્જનઃ ॥ ૧૧૯॥

પરઃ પરમકારુણ્યઃ પરબ્રહ્મમયસ્તથા ।
પ્રપન્નભયહારી ચ પ્રણતાર્તિહરસ્તથા ॥ ૧૨૦॥

પ્રસાદકૃત્ પ્રપઞ્ચશ્ચ પરાશક્તિ સમુદ્ભવઃ ।
પ્રદાનપાવનશ્ચૈવ પ્રશાન્તાત્મા પ્રભાકરઃ ॥ ૧૨૧॥

પ્રપઞ્ચાત્મા પ્રપઞ્ચોપશમનઃ પૃથિવીપતિઃ ।
પરશુરામ સમારાધ્યઃ પરશુરામવરપ્રદઃ ॥ ૧૨૨॥

પરશુરામ ચિરઞ્જીવિપ્રદઃ પરમપાવનઃ ।
પરમહંસસ્વરૂપશ્ચ પરમહંસસુપૂજિતઃ ॥ ૧૨૩॥

પઞ્ચનક્ષત્રાધિપશ્ચ પઞ્ચનક્ષત્રસેવિતઃ ।
પ્રપઞ્ચ રક્ષિતશ્ચૈવ પ્રપઞ્ચસ્ય ભયઙ્કરઃ ॥ ૧૨૪॥

ફલદાનપ્રિયશ્ચૈવ ફલહસ્તઃ ફલપ્રદઃ ।
ફલાભિષેકપ્રિયશ્ચ ફલ્ગુનસ્ય વરપ્રદઃ ॥ ૧૨૫॥

ફુટચ્છમિત પાપૌઘઃ ફલ્ગુનેન પ્રપૂજિતઃ ।
ફણિરાજપ્રિયશ્ચૈવ ફુલ્લામ્બુજ વિલોચનઃ ॥ ૧૨૬॥

બલિપ્રિયો બલી બભ્રુર્બ્રહ્મવિષ્ણ્વીશ ક્લેશકૃત્ ।
બ્રહ્મવિષ્ણ્વીશરૂપશ્ચ બ્રહ્મશક્રાદિદુર્લભઃ ॥ ૧૨૭॥

બાસદર્ષ્ટ્યા પ્રમેયાઙ્ગો બિભ્રત્કવચકુણ્ડલઃ ।
બહુશ્રુતો બહુમતિર્બ્રહ્મણ્યો બ્રાહ્મણપ્રિયઃ ॥ ૧૨૮॥

બલપ્રમથનો બ્રહ્મા બહુરૂપો બહુપ્રદઃ ।
બાલાર્કદ્યુતિમાન્બાલો બૃહદ્વક્ષા બૃહત્તનુઃ ॥ ૧૨૯॥

બ્રહ્માણ્ડભેદકૃચ્ચૈવ ભક્તસર્વાર્થસાધકઃ ।
ભવ્યો ભોક્તા ભીતિકૃચ્ચ ભક્તાનુગ્રહકારકઃ ॥ ૧૩૦॥

ભીષણો ભૈક્ષકારી ચ ભૂસુરાદિ સુપૂજિતઃ ।
ભોગભાગ્યપ્રદશ્ચૈવ ભસ્મીકૃત જગત્ત્રયઃ ॥ ૧૩૧॥

ભયાનકો ભાનુસૂનુર્ભૂતિભૂષિત વિગ્રહઃ ।
ભાસ્વદ્રતો ભક્તિમતાં સુલભો ભ્રુકુટીમુખઃ ॥ ૧૩૨॥

ભવભૂત ગણૈઃસ્તુત્યો ભૂતસંઘસમાવૃતઃ ।
ભ્રાજિષ્ણુર્ભગવાન્ભીમો ભક્તાભીષ્ટવરપ્રદઃ ॥ ૧૩૩॥

ભવભક્તૈકચિત્તશ્ચ ભક્તિગીતસ્તવોન્મુખઃ ।
ભૂતસન્તોષકારી ચ ભક્તાનાં ચિત્તશોધનઃ ॥ ૧૩૪॥

ભક્તિગમ્યો ભયહરો ભાવજ્ઞો ભક્તસુપ્રિયઃ ।
ભૂતિદો ભૂતિકૃદ્ ભોજ્યો ભૂતાત્મા ભુવનેશ્વરઃ ॥ ૧૩૫॥

મન્દો મન્દગતિશ્ચૈવ માસમેવ પ્રપૂજિતઃ ।
મુચુકુન્દ સમારાધ્યો મુચુકુન્દ વરપ્રદઃ ॥ ૧૩૬॥

મુચુકુન્દાર્ચિતપદો મહારૂપો મહાયશાઃ ।
મહાભોગી મહાયોગી મહાકાયો મહાપ્રભુઃ ॥ ૧૩૭॥

મહેશો મહદૈશ્વર્યો મન્દાર કુસુમપ્રિયઃ ।
મહાક્રતુર્મહામાની મહાધીરો મહાજયઃ ॥ ૧૩૮॥

મહાવીરો મહાશાન્તો મણ્ડલસ્થો મહાદ્યુતિઃ ।
મહાસુતો મહોદારો મહનીયો મહોદયઃ ॥ ૧૩૯॥

મૈથિલીવરદાયી ચ માર્તાણ્ડસ્ય દ્વિતીયજઃ ।
મૈથિલીપ્રાર્થનાક્લૃપ્ત દશકણ્ઠ શિરોપહૃત્ ॥ ૧૪૦॥

મરામરહરારાધ્યો મહેન્દ્રાદિ સુરાર્ચિતઃ ।
મહારથો મહાવેગો મણિરત્નવિભૂષિતઃ ॥ ૧૪૧॥

મેષનીચો મહાઘોરો મહાસૌરિર્મનુપ્રિયઃ ।
મહાદીર્ઘો મહાગ્રાસો મહદૈશ્વર્યદાયકઃ ॥ ૧૪૨॥

મહાશુષ્કો મહારૌદ્રો મુક્તિમાર્ગ પ્રદર્શકઃ ।
મકરકુમ્ભાધિપશ્ચૈવ મૃકણ્ડુતનયાર્ચિતઃ ॥ ૧૪૩॥

મન્ત્રાધિષ્ઠાનરૂપશ્ચ મલ્લિકાકુસુમપ્રિયઃ ।
મહામન્ત્ર સ્વરૂપશ્ચ મહાયન્ત્રસ્થિતસ્તથા ॥ ૧૪૪॥

મહાપ્રકાશદિવ્યાત્મા મહાદેવપ્રિયસ્તથા ।
મહાબલિ સમારાધ્યો મહર્ષિગણપૂજિતઃ ॥ ૧૪૫॥

મન્દચારી મહામાયી માષદાનપ્રિયસ્તથા ।
માષોદન પ્રીતચિત્તો મહાશક્તિર્મહાગુણઃ ॥ ૧૪૬॥

યશસ્કરો યોગદાતા યજ્ઞાઙ્ગોઽપિ યુગન્ધરઃ ।
યોગી યોગ્યશ્ચ યામ્યશ્ચ યોગરૂપી યુગાધિપઃ ॥ ૧૪૭॥

યજ્ઞભૃદ્ યજમાનશ્ચ યોગો યોગવિદાં વરઃ ।
યક્ષરાક્ષસવેતાળ કૂષ્માણ્ડાદિપ્રપૂજિતઃ ॥ ૧૪૮॥

યમપ્રત્યધિદેવશ્ચ યુગપદ્ ભોગદાયકઃ ।
યોગપ્રિયો યોગયુક્તો યજ્ઞરૂપો યુગાન્તકૃત્ ॥ ૧૪૯॥

રઘુવંશ સમારાધ્યો રૌદ્રો રૌદ્રાકૃતિસ્તથા ।
રઘુનન્દન સલ્લાપો રઘુપ્રોક્ત જપપ્રિયઃ ॥ ૧૫૦॥

રૌદ્રરૂપી રથારૂઢો રાઘવેષ્ટ વરપ્રદઃ ।
રથી રૌદ્રાધિકારી ચ રાઘવેણ સમર્ચિતઃ ॥ ૧૫૧॥

રોષાત્સર્વસ્વહારી ચ રાઘવેણ સુપૂજિતઃ ।
રાશિદ્વયાધિપશ્ચૈવ રઘુભિઃ પરિપૂજિતઃ ॥ ૧૫૨॥

રાજ્યભૂપાકરશ્ચૈવ રાજરાજેન્દ્ર વન્દિતઃ ।
રત્નકેયૂરભૂષાઢ્યો રમાનન્દનવન્દિતઃ ॥ ૧૫૩ ॥

રઘુપૌરુષસન્તુષ્ટો રઘુસ્તોત્રબહુપ્રિયઃ ।
રઘુવંશનૃપૈઃપૂજ્યો રણન્મઞ્જીરનૂપુરઃ ॥ ૧૫૪॥

રવિનન્દન રાજેન્દ્રો રઘુવંશપ્રિયસ્તથા ।
લોહજપ્રતિમાદાનપ્રિયો લાવણ્યવિગ્રહઃ ॥ ૧૫૫॥

લોકચૂડામણિશ્ચૈવ લક્ષ્મીવાણીસ્તુતિપ્રિયઃ ।
લોકરક્ષો લોકશિક્ષો લોકલોચનરઞ્જિતઃ ॥ ૧૫૬॥

લોકાધ્યક્ષો લોકવન્દ્યો લક્ષ્મણાગ્રજપૂજિતઃ ।
વેદવેદ્યો વજ્રદેહો વજ્રાઙ્કુશધરસ્તથા ॥ ૧૫૭॥

વિશ્વવન્દ્યો વિરૂપાક્ષો વિમલાઙ્ગવિરાજિતઃ ।
વિશ્વસ્થો વાયસારૂઢો વિશેષસુખકારકઃ ॥ ૧૫૮॥

વિશ્વરૂપી વિશ્વગોપ્તા વિભાવસુ સુતસ્તથા ।
વિપ્રપ્રિયો વિપ્રરૂપો વિપ્રારાધન તત્પરઃ ॥ ૧૫૯॥

વિશાલનેત્રો વિશિખો વિપ્રદાનબહુપ્રિયઃ ।
વિશ્વસૃષ્ટિ સમુદ્ભૂતો વૈશ્વાનરસમદ્યુતિઃ ॥ ૧૬૦॥

વિષ્ણુર્વિરિઞ્ચિર્વિશ્વેશો વિશ્વકર્તા વિશામ્પતિઃ ।
વિરાડાધારચક્રસ્થો વિશ્વભુગ્વિશ્વભાવનઃ ॥ ૧૬૧॥

વિશ્વવ્યાપારહેતુશ્ચ વક્રક્રૂરવિવર્જિતઃ ।
વિશ્વોદ્ભવો વિશ્વકર્મા વિશ્વસૃષ્ટિ વિનાયકઃ ॥ ૧૬૨॥

વિશ્વમૂલનિવાસી ચ વિશ્વચિત્રવિધાયકઃ ।
વિશ્વાધારવિલાસી ચ વ્યાસેન કૃતપૂજિતઃ ॥ ૧૬૩॥

વિભીષણેષ્ટવરદો વાઞ્છિતાર્થપ્રદાયકઃ ।
વિભીષણસમારાધ્યો વિશેષસુખદાયકઃ ॥ ૧૬૪॥

વિષમવ્યયાષ્ટજન્મસ્થોઽપ્યેકાદશફલપ્રદઃ ।
વાસવાત્મજસુપ્રીતો વસુદો વાસવાર્ચિતઃ ॥ ૧૬૫॥

વિશ્વત્રાણૈકનિરતો વાઙ્મનોતીતવિગ્રહઃ ।
વિરાણ્મન્દિરમૂલસ્થો વલીમુખસુખપ્રદઃ ॥ ૧૬૬॥

વિપાશો વિગતાતઙ્કો વિકલ્પપરિવર્જિતઃ ।
વરિષ્ઠો વરદો વન્દ્યો વિચિત્રાઙ્ગો વિરોચનઃ ॥ ૧૬૭॥

શુષ્કોદરઃ શુક્લવપુઃ શાન્તરૂપી શનૈશ્ચરઃ ।
શૂલી શરણ્યઃ શાન્તશ્ચ શિવાયામપ્રિયઙ્કરઃ ॥ ૧૬૮॥

શિવભક્તિમતાં શ્રેષ્ઠઃ શૂલપાણી શુચિપ્રિયઃ ।
શ્રુતિસ્મૃતિપુરાણજ્ઞઃ શ્રુતિજાલપ્રબોધકઃ ॥ ૧૬૯॥

શ્રુતિપારગ સમ્પૂજ્યઃ શ્રુતિશ્રવણલોલુપઃ ।
શ્રુત્યન્તર્ગતમર્મજ્ઞઃ શ્રુત્યેષ્ટવરદાયકઃ ॥ ૧૭૦॥

શ્રુતિરૂપઃ શ્રુતિપ્રીતઃ શ્રુતીપ્સિતફલપ્રદઃ ।
શુચિશ્રુતઃ શાન્તમૂર્તિઃ શ્રુતિશ્રવણકીર્તનઃ ॥ ૧૭૧॥

શમીમૂલનિવાસી ચ શમીકૃતફલપ્રદઃ ।
શમીકૃતમહાઘોરઃ શરણાગતવત્સલઃ ॥ ૧૭૨॥

શમીતરુસ્વરૂપશ્ચ શિવમન્ત્રજ્ઞમુક્તિદઃ ।
શિવાગમૈકનિલયઃ શિવમન્ત્રજપપ્રિયઃ ॥ ૧૭૩॥

શમીપત્રપ્રિયશ્ચૈવ શમીપર્ણસમર્ચિતઃ ।
શતોપનિષદસ્તુત્યઃ શાન્ત્યાદિગુણભૂષિતઃ ॥ ૧૭૪॥

શાન્ત્યાદિષડ્ગુણોપેતઃ શઙ્ખવાદ્યપ્રિયસ્તથા ।
શ્યામરક્તસિતજ્યોતિઃ શુદ્ધપઞ્ચાક્ષરપ્રિયઃ ॥ ૧૭૫॥

શ્રીહાલાસ્યક્ષેત્રવાસી શ્રીમાન્ શક્તિધરસ્તથા ।
ષોડશદ્વયસમ્પૂર્ણલક્ષણઃ ષણ્મુખપ્રિયઃ ॥ ૧૭૬॥

ષડ્ગુણૈશ્વર્યસંયુક્તઃ ષડઙ્ગાવરણોજ્જ્વલઃ ।
ષડક્ષરસ્વરૂપશ્ચ ષટ્ચક્રોપરિ સંસ્થિતઃ ॥ ૧૭૭॥

ષોડશી ષોડશાન્તશ્ચ ષટ્શક્તિવ્યક્તમૂર્તિમાન્ ।
ષડ્ભાવરહિતશ્ચૈવ ષડઙ્ગશ્રુતિપારગઃ ॥ ૧૭૮॥

ષટ્કોણમધ્યનિલયઃ ષટ્શાસ્ત્રસ્મૃતિપારગઃ ।
સ્વર્ણેન્દ્રનીલમકુટઃ સર્વાભીષ્ટપ્રદાયકઃ ॥ ૧૭૯॥

સર્વાત્મા સર્વદોષઘ્નઃ સર્વગર્વપ્રભઞ્જનઃ ।
સમસ્તલોકાભયદઃ સર્વદોષાઙ્ગનાશકઃ ॥ ૧૮૦॥

સમસ્તભક્તસુખદઃ સર્વદોષનિવર્તકઃ ।
સર્વનાશક્ષમઃ સૌમ્યઃ સર્વક્લેશનિવારકઃ ॥ ૧૮૧॥

સર્વાત્મા સર્વદા તુષ્ટઃ સર્વપીડાનિવારકઃ ।
સર્વરૂપી સર્વકર્મા સર્વજ્ઞઃ સર્વકારકઃ ॥ ૧૮૨॥

સુકૃતી સુલભશ્ચૈવ સર્વાભીષ્ટફલપ્રદઃ ।
સૂર્યાત્મજઃ સદાતુષ્ટઃ સૂર્યવંશપ્રદીપનઃ ॥ ૧૮૩ ॥

સપ્તદ્વીપાધિપશ્ચૈવ સુરાસુરભયઙ્કરઃ ।
સર્વસંક્ષોભહારી ચ સર્વલોકહિતઙ્કરઃ ॥ ૧૮૪॥

સર્વૌદાર્યસ્વભાવશ્ચ સન્તોષાત્સકલેષ્ટદઃ ।
સમસ્તઋષિભિઃસ્તુત્યઃ સમસ્તગણપાવૃતઃ ॥ ૧૮૫॥

સમસ્તગણસંસેવ્યઃ સર્વારિષ્ટવિનાશનઃ ।
સર્વસૌખ્યપ્રદાતા ચ સર્વવ્યાકુલનાશનઃ ॥ ૧૮૬॥

સર્વસંક્ષોભહારી ચ સર્વારિષ્ટ ફલપ્રદઃ ।
સર્વવ્યાધિપ્રશમનઃ સર્વમૃત્યુનિવારકઃ ॥ ૧૮૭॥

સર્વાનુકૂલકારી ચ સૌન્દર્યમૃદુભાષિતઃ ।
સૌરાષ્ટ્રદેશોદ્ભવશ્ચ સ્વક્ષેત્રેષ્ટવરપ્રદઃ ॥ ૧૮૮॥

સોમયાજિ સમારાધ્યઃ સીતાભીષ્ટ વરપ્રદઃ ।
સુખાસનોપવિષ્ટશ્ચ સદ્યઃપીડાનિવારકઃ ॥ ૧૮૯॥

સૌદામનીસન્નિભશ્ચ સર્વાનુલ્લઙ્ઘ્યશાસનઃ ।
સૂર્યમણ્ડલસઞ્ચારી સંહારાસ્ત્રનિયોજિતઃ ॥ ૧૯૦॥

સર્વલોકક્ષયકરઃ સર્વારિષ્ટવિધાયકઃ ।
સર્વવ્યાકુલકારી ચ સહસ્રજપસુપ્રિયઃ ॥ ૧૯૧॥

સુખાસનોપવિષ્ટશ્ચ સંહારાસ્ત્રપ્રદર્શિતઃ ।
સર્વાલઙ્કાર સંયુક્તકૃષ્ણગોદાનસુપ્રિયઃ ॥ ૧૯૨॥

સુપ્રસન્નઃ સુરશ્રેષ્ઠઃ સુઘોષઃ સુખદઃ સુહૃત્ ।
સિદ્ધાર્થઃ સિદ્ધસઙ્કલ્પઃ સર્વજ્ઞઃ સર્વદઃ સુખી ॥ ૧૯૩ ॥

સુગ્રીવઃ સુધૃતિઃ સારઃ સુકુમારઃ સુલોચનઃ ।
સુવ્યક્તઃ સચ્ચિદાનન્દઃ સુવીરઃ સુજનાશ્રયઃ ॥ ૧૯૪॥

હરિશ્ચન્દ્રસમારાધ્યો હેયોપાદેયવર્જિતઃ ।
હરિશ્ચન્દ્રેષ્ટવરદો હંસમન્ત્રાદિ સંસ્તુતઃ ॥ ૧૯૫॥

હંસવાહ સમારાધ્યો હંસવાહવરપ્રદઃ ।
હૃદ્યો હૃષ્ટો હરિસખો હંસો હંસગતિર્હવિઃ ॥ ૧૯૬॥

હિરણ્યવર્ણો હિતકૃદ્ધર્ષદો હેમભૂષણઃ ।
હવિર્હોતા હંસગતિર્હંસમન્ત્રાદિસંસ્તુતઃ ॥ ૧૯૭॥

હનૂમદર્ચિતપદો હલધૃત્ પૂજિતઃ સદા ।
ક્ષેમદઃ ક્ષેમકૃત્ક્ષેમ્યઃ ક્ષેત્રજ્ઞઃ ક્ષામવર્જિતઃ ॥ ૧૯૮॥

ક્ષુદ્રઘ્નઃ ક્ષાન્તિદઃ ક્ષેમઃ ક્ષિતિભૂષઃ ક્ષમાશ્રયઃ ।
ક્ષમાધરઃ ક્ષયદ્વારો નામ્નામષ્ટસહસ્રકમ્ ॥ ૧૯૯॥

વાક્યેનૈકેન વક્ષ્યામિ વાઞ્છિતાર્થં પ્રયચ્છતિ ।
તસ્માત્સર્વપ્રયત્નેન નિયમેન જપેત્સુધીઃ ॥ ૨૦૦॥

॥ ઇતિ શનૈશ્ચરસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

.. shrI shanaishchara sahasranAma stotram ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com